# Shri Hari Dhyana Stotram1

# શ્રીહરિધ્યાનસ્તોત્રં૧

## Document Information


Text title : Shri Hari Dhyana Stotram

File name : haridhyAnastotraM1.itx

Category : vishhnu, svAminArAyaNa, krishna, dhyAnam

Location : doc_vishhnu

Author : shatAnandamuni

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


August 9, 2024

*sanskritdocuments.org*

# શ્રીહરિધ્યાનસ્તોત્રં૧

(શાર્દૂલવિક્રીડિતમ્)
આદૌ પ્રેમવતી-વૃષાઙ્ગજનનં સન્નૈક-તીર્થાટનં
દુષ્કર્મોપશમં ચ સાધુશરણં સદ્ધર્મ-સંસ્થાપનમ્ ।
હિંસાવર્જિત-ભૂરિયજ્ઞકરણં મૂર્તિપ્રતિષ્ઠાપનં
આર્યસ્થાપનમક્ષરાખ્ય-ગમનં સત્સઙ્ગિસજ્જીવનમ્ ॥

સ્નાતં ચન્દનચર્ચિતં નિજજનૈઃ પુષ્પસ્રજાલઙ્કૃતં
પ્રાતઃ સૂર્યમયૂખ-સેવિતમુખં શ્રીચન્દ્રશાલોપરિ ।
ધૃત્વા રોટકમેકપાણિતલકે ભઙ્ક્ત્વાન્યહસ્તેન તં
ભુઞ્જાનં પ્રવિલોક્ય સેવકગણાન્ વન્દે સદા સ્વામિનમ્ ॥

(પુષ્પિતાગ્રા વૃત્તમ્)
અથ મનસિ શનૈઃ સ્થિરત્વમાપ્તે
ભગવતિ માનુષમૂર્તિ-વાસુદેવે ।
નિજહૃદિ પૃથગેક-મેકમઙ્ગં
ચરણતલાદિ વિચિન્ત્યમસ્ય પુંસામ્ ॥ ૧॥

નિજહૃદિ દ્રશિ ગોચરે તદીયે
હ્યવયવ એકએકકે પૃથક્ ચ ।
ચપલમપિ મનઃ સ્થિરં વિધેયં
વ્રજતિ લયં ખલુ તેન તન્મલૌઘઃ ॥ ૨॥

ધ્વજકમલ-યવાઙ્કુશોર્ધ્વ-રેખા
પ્રમુખ-સુલક્ષણલક્ષિતે ચ રમ્યે ।
અતિશય-મૃદુલે ચ યાવકાભે
ચરણતલે મનસાસ્ય ચિન્તનીયે ॥ ૩॥

અરુણનખ-શશાઙ્કુરાજિ-કાન્ત્યા
હૃતનિજચિન્તક-હૃત્તમોઙ્ઘ્રિયુગ્મમ્ ।

ક્રમલઘુસમ-કોમલાઙ્ગુલીભિર્
હૃતનવપલ્લવકાન્તિ ચાસ્ય ચિન્ત્યમ્ ॥ ૪॥

નિજજન-મનસઃ પ્રહર્ષણાર્થં
પરિધૃતનૂપુર-શિઞ્જિતાતિરમ્યમ્ ।
સ્વગતનિજજનાક્ષિ-વૃત્તિચોરં
ચરણયુગં હૃદિ ચિન્તનીયમસ્ય ॥ ૫॥

કિસલય-મૃદુલે સુવૃત્તજઙ્ઘે
ક્રમપૃથુલેથ સુવર્તુલૌ ચ જાનૂ ।
કરિકર સદ્રશં સમં ચ પીનં
નિજહૃદિ સક્થિયુગં ચ ચિન્ત્યમસ્ય ॥ ૬॥

મૃદુઘન-સિતસૂક્ષ્મ-દીર્ઘવાસઃ
પરિદધદુત્તમ-હૈમકાઞ્ચિનદ્ધમ્ ।
પૃથુલ-કટિયુગં ચ ચિન્તનીયં
નિજહૃદયે ચિરમસ્ય ભક્તભર્તુઃ ॥ ૭॥

ઉદરમપિ લસદ્-વલિત્રયાન્તર્
ગતશુભ-સભ્રમ-નિમ્નનાભિ-કૂપમ્ ।
હૃદયમુરુ-સુગન્ધિ-પુષ્પહારં
સમવિતતં હૃદિ ચિન્ત્યમસ્ય તુઙ્ગમ્ ॥ ૮॥

કનક-કટક-શ્રૃઙ્ખલોર્મિકાભિર્
લસદરુણાં જનિભં કરદ્વયં ચ ।
દ્રઢતર-મતિરમ્ય-બાહુયુગ્મં
નિજહૃદયેસ્ય વિચિન્ત્યમઙ્ગદાઢ્યમ્ ॥ ૯॥

વિવિધમણિ-વિશુદ્ધ-હેમસૂત્ર-
ગ્રથિતસુમૌક્તિક-હારહારિકણ્ઠઃ ।
વિગત-શશકલઙ્ક આસ્યચન્દ્રઃ
સ્થિરમનસાસ્યચિરઞ્ચચિન્તનીયમ્ ॥ ૧૦॥

મિતહસિત-વિસર્પિદન્તકાન્તિ-
પ્રથનસમુજ્જ્વલ-ગણ્ડયુગ્મમસ્ય ।
નવનલિન-દલાયતં વિચિન્ત્યં
નિજહૃદિ ચઞ્ચલ-લોચનદ્વયં ચ ॥ ૧૧॥

શ્રવણ-યુગલમસ્ય કુણ્ડલશ્રી-
ર્બહુવિધપુષ્પમયાવતં સ રમ્યમ્ ।
તરદલઘુ વિશાલભાલ-રાજત્-
સતિલક-કુઙ્કુમચન્દ્રકશ્ચ ચિન્ત્યઃ ॥ ૧૨॥

અસિત-તિલકલક્ષ્મ દક્ષગણ્ડે
તિલકુસુમોત્તમ-નાસિકાન્તિકેસ્તિ ।
વિલસદસિત-બિન્દુરસ્ય વામે
શ્રવણપુટે ભવતીતિ ચિન્તનીયઃ ॥ ૧૩॥

વિવિધકુસુમ-શેખરાલિરાજત્-
પટમુકુટં ચ શિરોસ્ય ચિન્તયિત્વા ।
વદનકમલમેવ ચિન્તકેન
સ્મિતમધુરં ચિરકાલમસ્ય ચિન્ત્યમ્ ॥ ૧૪॥

ઇતિ શ્રીશતાનન્દમુનિવિરચિતં શ્રીહરિધ્યાનસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Hari Dhyana Stotram1*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*